लोकप्रियसाहित्यग्रन्थमाला-60

# कवितापुत्रिकाजातिः

बलरामशुक्लः

लोक प्रिय ग्रन्थमाला संख्या-६०

# कवितापुत्रिकाजातिः

प्रधान सम्पादकः

**प्रो० परमेश्वरनारायण शास्त्री**

कविः

**बलरामशुक्लः**

राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)

मानितविश्वविद्यालयः

नवदेहली

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

# पुरोवाक्

वैदिककालाद् अजस्रं प्रवहन्ती संस्कृतकविताधारा सहृदयहृदि कान्तेव सरसतामापाद्य 'रामादिवद् वर्तितव्यं न रावणादिवद्' इति शिक्षयति वितरति च समग्रेऽपि संसारे शान्तिं सुखं च। अनादिकाव्यपरम्परापरिपुष्टा चिरपुराणी सेयं कुसुमकोमलभावसम्पत्समलङ्कृता नवनवानुरागपरिस्पन्दसम्भृता समग्रं परिवर्तनजातं भाववैविध्यं नवनवार्थबोधनव्याजेन धारयन्ती दिनानुदिनं चिरतारुण्यं भजत इति महते सन्तोषाय संस्कृतसमुपासकानां विदुषाम्।

ऊनविंश-विंशशतकयोः विविधदेशसंस्कृतिसंस्कारात् संस्कृतकविता सुविपुले फलके तद्विदाह्लादकारिणि बन्धे व्यवस्थिता सती नवीनं रूपम् अभिनवां भावविच्छित्तिं सरस-मसृण-शृङ्गारं चात्मसात्कुर्वती दृग्गोचरीभवति। अस्या हि कोमलायां कान्तायां च पारम्परिकतनुव्रतत्यां वैदेशिकी भावरम्यता विलसतीति सुधियोऽत्र प्रमाणम्। अविरलया निर्मलया पापापहारिण्या धारया निस्यन्दमाना भागीरथी गङ्गा यथा तत्तत्तीर्थकृतभेदैस्तत्तन्नाम्ना व्यपदेशं लभते तथैव सरसया सहृदयश्लाघ्यया रसधारया सञ्चरन्तीयं कविताऽपि क्वचित् महाकाव्यत्वेन क्वचित् खण्डकाव्यत्वेन क्वचिच्च रूपकादिरूपेण व्यवहृता भवति किन्तु न कुत्रापि तत्सरसता व्याहन्यते।

मुक्तकरूपेणाभिव्यक्तिं गच्छन्तीयं कविता कमप्यपूर्वमेव भावोद्बोधोदधिं समुपस्थापयति सहृदयानां पुरतः। सा चेयं मुक्तकपरम्परा क्वचित् महाकाव्यान्यप्यतिशेत इत्यानन्दवधना-दिसमीक्षकशिरोमणिवचोऽत्र प्रमाणम्। सेयं मुक्तकपरम्परा एकविंशशतकेऽस्मिन् सविशेषं प्रवर्तमाना दृश्यते। श्रीमता बलरामशुक्लेन सन्दृब्धोऽयं काव्यसङ्ग्रहस्तस्या एव परम्पराया अनितरसाधारणमुदाहरणम्। संस्कृतभाषाचषके पारसीककाव्यपीयूषं परिवेषयन् तरुणोऽयं कविः आरचयति कमप्यभिनवं काव्यास्वादसंसारम्। नूनं सुवर्णे सौरभमिव संस्कृते पारसीकभावनामुत्पादयन्नयं कविः स्मारयति क्वचित् पण्डितराजस्य काव्यचातुरीमिति संस्थानं सर्वथा युवकवेरस्य यशोवितानवृद्धिं कामयते।

प.ना.शास्त्री

(प्रो. परमेश्वरनारायणशास्त्री)

कुलपतिः

# विषयानुक्रमणी


| | |
|---|---|
| समर्पणम् | (v) |
| पुरोवक् | (vii) |
| अस्ति कश्चिद् वागर्थः –शतावधानी रा० गणेशः | (ix) |
| प्रास्ताविकम् | (xix) |
| १. न केवलं कृष्ण | १ |
| २. निटिलतटे पटीरचर्चा | ३ |
| ३. वयं केऽपि कवयः | ५ |
| ४. प्रहर्षणम् | ७ |
| ५. कदाचिदपि | ८ |
| ६. कामाश्रवः | १० |
| ७. माहाभाग्यम् | ११ |
| ८. काम आततायी | १२ |
| ९. अम्बिकाशिशुः | १४ |
| १०. जीवनकरी कविता | १६ |
| ११. मधुरमधरयुग्मम् | १७ |
| १२. नवकवित्वमयी वसतिः | १८ |
| १३. केनापूरि तवाधरेऽमृतरसः | १९ |
| १४. प्रघूर्णनम् | २१ |
| १५. प्रियात् प्रशस्तिः | २३ |
| १६. जागर्तु कृष्ण! | २४ |
| १७. वर्धापनम् मङ्गलम् | २५ |
| १८. मत्तमयूरम् | २७ |

# शङ्करार्कः[1]

यद्यत्काले भारते धर्मपीडा तत्तत्काले विश्वपाः प्रादुरस्ति।
एवं काले व्याप्तबौद्धान्धकारे शम्भुर्भातः केरले शङ्करार्कः॥

सोऽद्वैतेन्दुं भाष्यमन्थानमन्थैर्वेदाम्भोधेरन्तरादुज्जहार।
संचिन्वद्भिः पद्मपादादिशिष्यैः ख्यातिं यातो यश्चतुर्भिश्चकोरैः॥

आर्यावर्ते दिक्षु सर्वासु शिष्या न्यस्तास्तेनाद्वैतबोधाय, तत्र।
ज्योतिष्पीठे पर्ययाद् बृंहितात्मा ब्रह्मानन्दस्वामिपादोऽभ्यनन्दत्॥

सोऽप्यागच्छद् भक्तलोकानुरोधात् कारुण्याक्तश्चात्र जाबालिपुर्याम्।
वेदाधीत्यै धर्मसंवर्धनार्थं तत्तृड् जाता स्यादिहाध्येतृशाला॥

तां तत्पश्चात् कृष्णबोधाश्रमोऽपि कर्तुं दैवान्नाशकन् न स्वयं सः।
श्रीमांस्तस्मान् मूर्तधर्मस्वरूपोऽत्रानन्दान्तो देशिकः सत्स्वरूपः॥

ज्योतिष्पीठाधीश्वरो धर्मगुप्त्यै पाखण्डानां खण्डनार्थं, शिवाय।
सर्वेषामप्यार्यवंशोद्भवानाम् इच्छापूर्त्यै श्रीगुरूणां निजानाम्॥

स्थानं देव्याः सन्मठं शङ्करस्य श्रीगायत्रीवेदविद्यालयं च ।
संस्थाप्यास्मान् सेवकानन्वगृह्णात् कारुण्यौघैः सेचितस्वान्तभावान्॥

माङ्गल्याब्दे वैक्रमाख्ये प्लवङ्गे पञ्चम्यां तन्माघशुक्लस्य मासे।
जातान्येषां भव्यमुद्घाटनानि वार्तात्रैषा ग्राव्णि गीता विभाति॥

---

१. कुत्रचिदुट्टङ्कनायाभ्यर्थितः सन् लिखितवानिमां सूचनात्मिकां कविताम्।

राष्ट्रियसंस्कृतसस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
नवदेहली